५९. पञ्चमे **दारुकम्मिको**ति दारुविक्कयेन पवत्तिताजीवो एको उपासको। **कासिकचन्दन**न्ति सण्हचन्दनं। **अङ्गेना**ति अगुणङ्गेन, सुक्कपक्खे गुणङ्गेन। **नेमन्तनिको**ति निमन्तनं गण्हनको। **सङ्घे दानं दस्सामी**ति भिक्खुसङ्घस्स दस्सामि। सो एवं वत्वा सत्थारं अभिवादेत्वा पक्कामि। अथस्स अपरभागे पञ्चसता कुलूपका भिक्खू गिहिभावं पापुणिंसु। सो ''कुलूपकभिक्खू ते विब्भन्ता''ति वुत्ते ''किं एत्थ मय्ह''न्ति वत्वा चित्तुप्पादवेमत्तमत्तम्पि न अकासि। इदं सन्धाय सत्था **सङ्घे ते दानं ददतो चित्तं पसीदिस्सती**ति आह।

६. हत्थिसारिपुत्तसुत्तवण्णना

६०. छट्ठे **अभिधम्मकथ**न्ति अभिधम्ममिस्सकं कथं। **कथं ओपातेती**ति तेसं कथं विच्छिन्दित्वा अत्तनो कथं कथेति। **थेरानं भिक्खून**न्ति करणत्थे सामिवचनं, थेरेहि भिक्खूहि सद्धिन्ति अत्थो। या च थेरानं अभिधम्मकथा, तं अयम्पि कथेतुं सक्कोतीति अत्थो। **चेतोपरियाय**न्ति चित्तवारं। **इधा**ति इमस्मिं लोके। **सोरतसोरतो**ति सूरतो विय सूरतो, सोरच्चसमन्नागतो वियाति अत्थो। **निवातनिवातो**ति निवातो विय निवातो, निवातवुत्ति वियाति अत्थो। **उपसन्तुपसन्तो**ति उपसन्तो विय उपसन्तो। **वपकस्सतेव सत्थारा**ति सत्थु सन्तिका अपगच्छति। **संसट्ठस्सा**ति पञ्चहि संसग्गेहि संसट्ठस्स। **विस्सट्ठस्सा**ति विस्सज्जितस्स। **पाकतस्सा**ति पाकतिन्द्रियस्स।

किट्ठादोति किट्ठखादको। **अन्तरधापेय्या**ति नासेय्य। **गोपसू**ति गावो च अजिका च। **सिप्पिसम्बुक**न्ति सिप्पियो च सम्बुका च। **सक्खरकठल**न्ति सक्खरा च कठलानि च। **आभिदोसिक**न्ति अभिञ्ञातदोसं कुद्रूसकभोजनं। **नच्छादेय्या**ति न रुच्चेय्य। तत्थ यदेतं **पुरिसं भुत्तावि**न्ति उपयोगवचनं, तं सामिअत्थे दट्ठब्बं। **अमुं हावुसो, पुरिस**न्ति, आवुसो, अमुं पुरिसं।

सब्बनिमित्तानन्ति सब्बेसं निच्चनिमित्तादीनं निमित्तानं। **अनिमित्तं चेतोसमाधि**न्ति बलवविपस्सनासमाधिं। **चीरिकसद्दो**ति झल्लिकसद्दो। **सरिस्सति नेक्खम्मस्सा**ति पब्बज्जाय गुणं सरिस्सति। **अरहतं अहोसी**ति भगवतो सावकानं अरहन्तानं अन्तरे एको अरहा अहोसि। अयञ्हि थेरो सत्त वारे गिही हुत्वा सत्त वारे पब्बजि। किं कारणा? कस्सपसम्मासम्बुद्धकाले किरेस एकस्स भिक्खुनो गिहिभावे वण्णं कथेसि। सो तेनेव कम्मेन अरहत्तस्स उपनिस्सये विज्जमानेयेव सत्त वारे गिहिभावे च पब्बज्जाय च सञ्चरन्तो सत्तमे वारे पब्बजित्वा अरहत्तं पापुणीति।

७. मज्झेसुत्तवण्णना

६१. सत्तमे **पारायने मेत्तेय्यपञ्हे**ति पारायनसमागमम्हि मेत्तेय्यमाणवस्स पञ्हे। **उभोन्ते विदित्वाना**ति द्वे अन्ते द्वे कोट्ठासे जानित्वा। **मज्झे मन्ता न लिप्पती**ति मन्ता वुच्चति पञ्ञा, ताय उभो अन्ते विदित्वा मज्झे न लिप्पति, वेमज्झेट्ठाने न लिप्पति। **सिब्बनिमच्चगा**ति सिब्बनिसङ्खातं तण्हं अतीतो। **फस्सो**ति फस्सवसेन निब्बत्तत्ता अयं अत्तभावो। **एको अन्तो**ति अयमेको कोट्ठासो। **फस्ससमुदयो**ति फस्सो समुदयो अस्साति फस्ससमुदयो, इमस्मिं अत्तभावे कतकम्मफस्सपच्चया निब्बत्तो अनागतत्तभावो। **दुतियो अन्तो**ति दुतियो कोट्ठासो। **फस्सनिरोधो**ति निब्बानं। **मज्झे**ति सिब्बिनितण्हं छेत्वा द्विधाकरणट्ठेन निब्बानं मज्झे नाम होति। **तण्हा हि नं सिब्बती**ति तण्हा नं अत्तभावद्वयसङ्खातं फस्सञ्च फस्ससमुदयञ्च सिब्बति घट्टेति। किं कारणा? तस्स तस्सेव भवस्स अभिनिब्बत्तिया। यदि हि तण्हा न सिब्बेय्य, तस्स तस्स भवस्स निब्बत्ति न भवेय्य। इमस्मिं ठाने कोटिमज्झिकूपमं गण्हन्ति। द्विन्नञ्हि कण्डानं एकतो कत्वा मज्झे सुत्तेन संसिब्बितानं कोटि मज्झन्ति वुच्चति। सुत्ते छिन्ने उभो कण्डानि उभतो पतन्ति। एवमेत्थ कण्डद्वयं विय वुत्तप्पकारा द्वे अन्ता, सिब्बित्वा ठितसुत्तं विय तण्हा, सुत्ते छिन्ने कण्डद्वयस्स उभतोपतनं विय तण्हाय निरुद्धाय अन्तद्वयं निरुद्धमेव होति। **एत्तावता**ति एत्तकेन इमिना उभो अन्ते विदित्वा तण्हाय मज्झे अनुपलित्तभावेन अभिञ्ञेय्यं चतुसच्चधम्मं अभिजानाति नाम, तीरणपरिञ्ञाय च पहानपरिञ्ञाय च परिजानितब्बं लोकियसच्चद्वयं परिजानाति नाम। **दिट्ठेव धम्मे**ति इमस्मिंयेव अत्तभावे। **दुक्खस्सन्तकरो होती**ति वट्टदुक्खस्स कोटिकरो परिच्छेदपरिवटुमकरो होति नाम।

दुतियवारे तिण्णं कण्डानं वसेन उपमा वेदितब्बा। तिण्णञ्हि कण्डानं सुत्तेन संसिब्बितानं सुत्ते छिन्ने तीणि कण्डानि तीसु ठानेसु पतन्ति, एवमेत्थ कण्डत्तयं विय अतीतानागतपच्चुप्पन्ना खन्धा, सुत्तं विय तण्हा। सा हि अतीतं पच्चुप्पन्नेन, पच्चुप्पन्नञ्च अनागतेन सद्धिं संसिब्बति। सुत्ते छिन्ने कण्डत्तयस्स तीसु ठानेसु पतनं विय तण्हाय निरुद्धाय अतीतानागतपच्चुप्पन्ना खन्धा निरुद्धाव होन्ति।

ततियवारे **अदुक्खमसुखा मज्झे**ति द्विन्नं वेदनानं अन्तरट्ठकभावेन मज्झे। सुखञ्हि दुक्खस्स, दुक्खं वा सुखस्स अन्तरं नाम नत्थि। **तण्हा सिब्बिनी**ति वेदनासु नन्दिरागो वेदनानं उपच्छेदं निवारेतीति ता सिब्बति नाम।

चतुत्थवारे **विञ्ञाणं मज्झे**ति पटिसन्धिविञ्ञाणम्पि सेसविञ्ञाणम्पि नामरूपपच्चयसमुदागतत्ता नामरूपानं मज्झे नाम।

पञ्चमवारे **विञ्ञाणं मज्झे**ति कम्मविञ्ञाणं मज्झे, अज्झत्तिकायतनेसु वा मनायतनेन कम्मस्स गहितत्ता इध यंकिञ्चि विञ्ञाणं मज्झे नाम, मनोद्वारे वा आवज्जनस्स अज्झत्तिकायतननिस्सितत्ता जवनविञ्ञाणं मज्झे नाम।

छट्ठवारे **सक्कायो**ति तेभूमकवट्टं। **सक्कायसमुदयो**ति समुदयसच्चं। **सक्कायनिरोधो**ति निरोधसच्चं। **परियायेना**ति तेन तेन कारणेनेव। सेसं सब्बत्थ वुत्तनयेनेव वेदितब्बं।

८. पुरिसिन्द्रियञाणसुत्तवण्णना

६२. अट्ठमे **अञ्ञतरो**ति देवदत्तपक्खिको एको। **समन्नाहरित्वा**ति आवज्जित्वा। इदं सो ''किं नु खो भगवता जानित्वा कथितं, उदाहु अजानित्वा, एकंसिकं वा कथितं उदाहु विभज्जकथित''न्ति अधिप्पायेन पुच्छति। **आपायिको**ति अपाये निब्बत्तनको। **नेरयिको**ति निरयगामी। **कप्पट्ठो**ति कप्पट्ठियकम्मस्स कतत्ता कप्पं ठस्सति। **अतेकिच्छो**ति न सक्का

तिकिच्छितुं। **द्वेज्झ**न्ति द्विधाभावं। **वालग्गकोटिनित्तुदनमत्त**न्ति वालस्स अग्गकोटिया दस्सेतब्बमत्तकं, वालग्गकोटिनिपातमत्तकं वा। **पुरिसिन्द्रियञाणानी**ति पुरिसपुग्गलानं इन्द्रियपरोपरियत्तञाणानि, इन्द्रियानं तिक्खमुदुभावजाननञाणानीति अत्थो।

विज्जमाना कुसलापि धम्मा अकुसलापि धम्माति एत्तका कुसला धम्मा विज्जन्ति, एत्तका अकुसला धम्माति जानामि। **अन्तरहिता**ति अदस्सनं गता। **सम्मुखीभूता**ति समुदाचारवसेन पाकटा जाता। **कुसलमूल**न्ति कुसलज्झासयो। **कुसला कुसल**न्ति तम्हा कुसलज्झासया अञ्ञम्पि कुसलं निब्बत्तिस्सति। **सारदानी**ति सारादानि गहितसारानि, सरदमासे वा निब्बत्तानि। **सुखसयितानी**ति सुखसन्निचितानि। **सुखेत्ते**ति मण्डखेत्ते। **निक्खित्तानी**ति वुत्तानि। **सप्पटिभागा**ति सरिक्खका। **अभिदो अद्धरत्त**न्ति अभिअद्धरत्तं अद्धरत्ते अभिमुखीभूते। **भत्तकालसमये**ति राजकुलानं भत्तकालसङ्खाते समये। **परिहानधम्मो**ति को एवं भगवता ञातोति? अजातसत्तुराजा। सो हि पापमित्तं निस्साय मग्गफलेहि परिहीनो। अपरेपि सुप्पबुद्धसुनक्खत्तादयो भगवता ञाताव। **अपरिहानधम्मो**ति एवं भगवता को ञातो? सुसीमो परिब्बाजको अञ्ञे च एवरूपा। **परिनिब्बायिस्सती**ति एवं को ञातो भगवताति? सन्ततिमहामत्तो अञ्ञे च एवरूपा।

९. निब्बेधिकसुत्तवण्णना

६३. नवमे अनिब्बिद्धपुब्बे अप्पदालितपुब्बे लोभक्खन्धादयो निब्बिज्झति पदालेतीति **निब्बेधिकपरियायो,** निब्बिज्झनकारणन्ति अत्थो। **निदानसम्भवो**ति कामे निदेति उप्पादनसमत्थताय निय्यादेतीति निदानं। सम्भवति ततोति सम्भवो, निदानमेव सम्भवो **निदानसम्भवो। वेमत्तता**ति नानाकरणं।

कामगुणाति कामयितब्बट्ठेन कामा, बन्धनट्ठेन गुणा ''अन्तगुण''न्तिआदीसु विय। **चक्खुविञ्ञेय्या**ति चक्खुविञ्ञाणेन पस्सितब्बा। **इट्ठा**ति परियिट्ठा वा होन्तु मा वा, इट्ठारम्मणभूताति अत्थो। **कन्ता**ति कमनीया। **मनापा**ति मनवड्ढनका। **पियरूपा**ति पियजातिका। **कामूपसञ्हिता**ति आरम्मणं कत्वा उप्पज्जमानेन कामेन उपसञ्हिता। **रजनीया**ति रागुप्पत्तिकारणभूता। **नेते कामा**ति न एते कमनट्ठेन कामा नाम होन्ति। **सङ्कप्परागो**ति सङ्कप्पवसेन उप्पन्नरागो। **कामो**ति अयं कामप्पहानाय पटिपन्नेहि पहातब्बो। कमनट्ठेन कामा नाम। **चित्रानी**ति चित्रविचित्रारम्मणानि।

फस्सोति सहजातफस्सो। **कामयमानो**ति कामं कामयमानो। **तज्जं तज्ज**न्ति तज्जातिकं तज्जातिकं। **पुञ्ञभागिय**न्ति दिब्बे कामे पत्थेत्वा सुचरितपारिपूरिया देवलोके निब्बत्तस्स अत्तभावो पुञ्ञभागियो नाम, दुच्चरितपारिपूरिया अपाये निब्बत्तस्स अत्तभावो अपुञ्ञभागियो नाम। **अयं वुच्चति, भिक्खवे, कामानं विपाको**ति अयं दुविधोपि कामपत्थनं निस्साय उप्पन्नत्ता कामानं विपाकोति वुच्चति। **सो इमं निब्बेधिक**न्ति सो भिक्खु इमं छत्तिंसट्ठानेसु निब्बिज्झनकं सेट्ठचरियं जानाति। **कामनिरोध**न्ति कामानं निरोधने एवं लद्धनामं। इमस्मिञ्हि ठाने ब्रह्मचरियसङ्खातो मग्गोव कामनिरोधोति वुत्तो।

सामिसाति किलेसामिससम्पयुत्ता। इमिना नयेन सब्बठानेसु अत्थो वेदितब्बो। अपिचेत्थ **वोहारवेपक्क**न्ति वोहारविपाकं। कथासङ्खातो हि वोहारो सञ्ञाय विपाको नाम। **यथा यथा न**न्ति एत्थ **नं**-इति निपातमत्तमेव। इति यस्मा यथा यथा सञ्जानाति, तथा तथा एवंसञ्ञी अहोसिन्ति कथेति, तस्मा वोहारवेपक्काति अत्थो।

अविज्जाति अट्ठसु ठानेसु अञ्ञाणभूता बहलअविज्जा। निरयं गमेन्तीति **निरयगमनीया,** निरये निब्बत्तिपच्चयाति

अत्थो। सेसेसुपि एसेव नयो। **चेतनाह**न्ति चेतनं अहं। इध सब्बसङ्गाहिका संविदहनचेतना गहिता। **चेतयित्वा**ति द्वारप्पवत्तचेतना। **मनसा**ति चेतनासम्पयुत्तचित्तेन। **निरयवेदनीय**न्ति निरये विपाकदायकं। सेसेसुपि एसेव नयो। **अधिमत्त**न्ति बलवदुक्खं। **दन्धविरागी**ति गरुकं न खिप्पं सणिकं विगच्छनकदुक्खं। **उरत्ताळिं कन्दती**ति उरं ताळेत्वा रोदति। **परियेट्ठि**न्ति परियेसनं। **एकपदं द्विपद**न्ति एकपदमन्तं वा द्विपदमन्तं वा, को मन्तं जानातीति अत्थो। **सम्मोहवेपक्क**न्ति सम्मोहविपाकं। दुक्खस्स हि सम्मोहो निस्सन्दविपाको नाम। दुतियपदेपि एसेव नयो। परियेसनापि हि तस्स निस्सन्दविपाकोति। इमस्मिं सुत्ते वट्टविवट्टं कथितं।

१०. सीहनादसुत्तवण्णना

६४. दसमे **आसभं ठान**न्ति सेट्ठं निच्चलट्ठानं। **सीहनाद**न्ति अभीतनादं पमुखनादं। **ब्रह्मचक्क**न्ति सेट्ठञाणचक्कं पटिवेधञाणञ्चेव देसनाञाणञ्च। **ठानञ्च ठानतो**ति कारणञ्च कारणतो। **यम्पी**ति येन ञाणेन। **इदम्पि तथागतस्सा**ति इदम्पि ठानाट्ठानञाणं तथागतस्स तथागतबलं नाम होति। एवं सब्बपदेसु अत्थो वेदितब्बो। **कम्मसमादानान**न्ति समादियित्वा कतानं कुसलाकुसलकम्मानं, कम्ममेव वा कम्मसमादानं। **ठानसो हेतुसो**ति पच्चयतो चेव हेतुतो च। तत्थ गतिउपधिकालपयोगा विपाकस्स ठानं, कम्मं हेतु। **झानविमोक्खसमाधिसमापत्तीन**न्ति चतुन्नं झानानं अट्ठन्नं विमोक्खानं तिण्णं समाधीनं नवन्नं अनुपुब्बसमापत्तीनञ्च। **संकिलेस**न्ति हानभागियं धम्मं। **वोदान**न्ति विसेसभागियं धम्मं। **वुट्ठान**न्ति ''वोदानम्पि वुट्ठानं, तम्हा तम्हा समाधिम्हा वुट्ठानम्पि वुट्ठान''न्ति (विभ॰ ८२८) एवं वुत्तं पगुणज्झानञ्चेव भवङ्गफलसमापत्तियो च। हेट्ठिमं हेट्ठिमञ्हि पगुणज्झानं उपरिमस्स उपरिमस्स पदट्ठानं होति, तस्मा ''वोदानम्पि वुट्ठान''न्ति वुत्तं। भवङ्गेन पन सब्बज्झानेहि वुट्ठानं होति, फलसमापत्तिया निरोधसमापत्तितो वुट्ठानं होति। तं सन्धाय ''तम्हा तम्हा समाधिम्हा वुट्ठानम्पि वुट्ठान''न्ति वुत्तं। **अनेकविहित**न्तिआदीनि विसुद्धिमग्गे (विसुद्धि॰ २.४०२) वण्णितानि। आसवक्खयञाणं हेट्ठा वुत्तत्थमेव। पुरिमस्सापि ञाणत्तयस्स वित्थारकथं इच्छन्तेन मज्झिमट्ठकथाय महासीहनादवण्णना (म॰ नि॰ अट्ठ॰ १.१४६ आदयो) ओलोकेतब्बा। **समाहितस्सा**ति एकग्गचित्तस्स। **समाधि मग्गो**ति समाधि एतेसं ञाणानं अधिगमाय उपायो। **असमाधी**ति अनेकग्गभावो। **कुम्मग्गो**ति मिच्छामग्गो। इमस्मिं सुत्ते तथागतस्स ञाणबलं कथितन्ति।

महावग्गो छट्ठो।

७. देवतावग्गो

१-३. अनागामिफलसुत्तादिवण्णना

६५-६७. सत्तमस्स पठमे **अस्सद्धिय**न्ति अस्सद्धभावं। **दुप्पञ्ञत**न्ति निप्पञ्ञभावं। दुतिये **पमाद**न्ति सतिविप्पवासं। ततिये **आभिसमाचारिक**न्ति उत्तमसमाचारभूतं वत्तवसेन पण्णत्तिसीलं। **सेखधम्म**न्ति सेखपण्णत्तिसीलं। **सीलानी**ति चत्तारि महासीलानि।

४. सङ्गणिकारामसुत्तवण्णना

६८. चतुत्थे **सङ्गणिकारामो**ति गणसङ्गणिकारामो। सुत्तन्तिकगणादीसु पन गणेसु अत्तनो वा परिसासङ्खाते गणे रमतीति **गणारामो। पविवेके**ति कायविवेके। **चित्तस्स निमित्त**न्ति समाधिविपस्सनाचित्तस्स निमित्तं

समाधिविपस्सनाकारं। **सम्मादिट्ठि**न्ति विपस्सनासम्मादिट्ठिं। **समाधि**न्ति मग्गसमाधिञ्चेव फलसमाधिञ्च। **संयोजनानी**ति दस संयोजनानि। **निब्बान**न्ति अपच्चयपरिनिब्बानं।

५. देवतासुत्तवण्णना

६९. पञ्चमे **सोवचस्सता**ति सुब्बचभावो। **कल्याणमित्तता**ति सुचिमित्तता। **सत्थुगारवो**ति सत्थरि गारवयुत्तो। एस नयो सब्बत्थ।

६. समाधिसुत्तवण्णना

७०. छट्ठे **न सन्तेना**ति पच्चनीककिलेसेहि अवूपसन्तेन। **न पणीतेना**ति न अतप्पकेन। **न पटिप्पस्सद्धिलद्धेना**ति किलेसप्पटिप्पस्सद्धिया अलद्धेन अप्पत्तेन। **न एकोदिभावाधिगतेना**ति न एकग्गभावं उपगतेन।

७. सक्खिभब्बसुत्तवण्णना

७१. सत्तमे **तत्र तत्रा**ति तस्मिं तस्मिं विसेसे। **सक्खिभब्बत**न्ति पच्चक्खभावं। **आयतने**ति कारणे। **हानभागिया**दयो विसुद्धिमग्गे (विसुद्धि० १.३९) संवण्णिता। **असक्कच्चकारी**ति न सुकतकारी, न आदरकारी। **असप्पायकारी**ति न सप्पायकारी, न उपकारभूतधम्मकारी।

८. बलसुत्तवण्णना

७२. अट्ठमे **बलत**न्ति बलभावं थामभावं। **असातच्चकारी**ति न सततकारी। सेसं हेट्ठा वुत्तनयमेव।

९-१०. तज्झानसुत्तद्वयवण्णना

७३-७४. नवमे **न यथाभूतं सम्मप्पञ्ञाय सुदिट्ठो होती**ति वत्थुकामकिलेसकामेसु आदीनवो न यथासभावतो ञाणपञ्ञाय सुदिट्ठो होति। दसमं उत्तानत्थमेवाति।

देवतावग्गो सत्तमो।

८. अरहत्तवग्गो

१. दुक्खसुत्तवण्णना

७५. अट्ठमस्स पठमे **सविघात**न्ति सउपघातं सोपद्दवं। **सपरिळाह**न्ति कायिकचेतसिकेन परिळाहेन सपरिळाहं। **पाटिकङ्खा**ति इच्छितब्बा अवस्संभाविनी।

२. अरहत्तसुत्तवण्णना

७६. दुतिये **मान**न्ति जातिआदीहि मञ्ञनं। **ओमान**न्ति हीनोहमस्मीति मानं। **अतिमान**न्ति अतिक्कमित्वा पवत्तं

अच्चुण्णतिमानं। **अधिमान**न्ति अधिगतमानं। **थम्भ**न्ति कोधमानेहि थद्धभावं। **अतिनिपात**न्ति हीनस्स हीनोहमस्मीति मानं।

३. उत्तरिमनुस्सधम्मसुत्तवण्णना

७७. ततिये **उत्तरिमनुस्सधम्मा**ति मनुस्सधम्मतो उत्तरि। **अलमरियञाणदस्सनविसेस**न्ति अरियभावं कातुं समत्थं ञाणदस्सनविसेसं, चत्तारो मग्गे चत्तारि च फलानीति अत्थो। **कुहन**न्ति तिविधं कुहनवत्थुं। **लपन**न्ति लाभत्थिकताय उक्खिपित्वा अवक्खिपित्वा वा लपनं।

४. सुखसोमनस्ससुत्तवण्णना

७८. चतुत्थे **योनि चस्स आरद्धा होती**ति कारणञ्चस्स परिपुण्णं पग्गहितं होति। **धम्मारामो**ति धम्मे रतिं विन्दति। भावनाय रमति, भावेन्तो वा रमतीति **भावनारामो**। पहाने रमति, पजहन्तो वा रमतीति **पहानारामो**। तिविधे पविवेके रमतीति **पविवेकारामो**। अब्यापज्झे निद्दुक्खभावे रमतीति **अब्यापज्झारामो**। निप्पपञ्चसङ्खाते निब्बाने रमतीति **निप्पपञ्चारामो**।

५. अधिगमसुत्तवण्णना

७९. पञ्चमे **न आयकुसलो**ति न आगमनकुसलो। **न अपायकुसलो**ति न अपगमनकुसलो। **छन्द**न्ति कत्तुकम्यताछन्दं। **न आरक्खती**ति न रक्खति।

६. महन्तत्तसुत्तवण्णना

८०. छट्ठे **आलोकबहुलो**ति ञाणालोकबहुलो। **योगबहुलो**ति योगे बहुलं करोति। **वेदबहुलो**ति पीतिपामोज्जबहुलो। **असन्तुट्ठिबहुलो**ति कुसलधम्मेसु असन्तुट्ठो। **अनिक्खित्तधुरो**ति अट्ठपितधुरो पग्गहितवीरियो। **उत्तरि च पतारेती**ति सम्पति च उत्तरिञ्च वीरियं करोतेव। सत्तमं उत्तानमेव।

८-१०. दुतियनिरयसुत्तादिवण्णना

८२-८४. अट्ठमे **पगब्भो**ति कायपागब्भियादीहि समन्नागतो। नवमं उत्तानत्थमेव। दसमे **विघातवा**ति महिच्छतं निस्साय उप्पन्नेन लोभदुक्खेन दुक्खितो। सेसं सब्बत्थ उत्तानमेवाति।

अरहत्तवग्गो अट्ठमो।

९. सीतिवग्गो

१. सीतिभावसुत्तवण्णना

८५. नवमस्स पठमे **सीतिभाव**न्ति सीतलभावं। **यस्मिं समये चित्तं निग्गण्हितब्ब**न्तिआदीसु उद्धच्चसमये चित्तं

समाधिना निग्गहेतब्बं नाम, कोसज्जानुपतितकाले वीरियेन पग्गहेतब्बं नाम, निरस्सादगतकाले समाधिना सम्पहंसितब्बं नाम, समप्पवत्तकाले बोज्झङ्गुपेक्खाय अज्झुपेक्खितब्बं नाम।

२. आवरणसुत्तवण्णना

८६. दुतिये **कम्मावरणताया**ति पञ्चानन्तरियकम्मेहि। **किलेसावरणताया**ति नियतमिच्छादिट्ठिया। **विपाकावरणताया**ति अकुसलविपाकपटिसन्धिया वा कुसलविपाकेहि अहेतुकपटिसन्धिया वाति।

४-५. सुस्सूसतिसुत्तादिवण्णना

८८-८९. चतुत्थे **अनत्थ**न्ति अवड्ढिं। **अत्थं रिञ्चती**ति वड्ढिअत्थं छड्डेति। **अननुलोमिकाया**ति सासनस्स अननुलोमिकाय। पञ्चमे **दिट्ठिसम्पद**न्ति सोतापत्तिमग्गं।

८-११. अभब्बट्ठानसुत्तचतुक्कवण्णना

९२-९५. अट्ठमे **अनागमनीयं वत्थु**न्ति अनुपगन्तब्बं कारणं, पञ्चन्नं वेरानं द्वासट्ठिया च दिट्ठिगतानमेतं अधिवचनं। **अट्ठमं भव**न्ति कामावचरे अट्ठमं पटिसन्धिं। नवमे **कोतूहलमङ्गलेना**ति दिट्ठसुतमुतमङ्गलेन। दसमे **सयंकत**न्तिआदीनि अत्तदिट्ठिवसेन वुत्तानि। **अधिच्चसमुप्पन्न**न्ति अहेतुनिब्बत्तं। सेसं सब्बत्थ उत्तानमेवाति।

सीतिवग्गो नवमो।

१०. आनिसंसवग्गो

१-२. पातुभावसुत्तादिवण्णना

९६-९७. दसमस्स पठमे **अरियायतने**ति मज्झिमदेसे। **इन्द्रियान**न्ति मनच्छट्ठानं। दुतिये **सद्धम्मनियतो**ति सासनसद्धम्मे नियतो। **असाधारणेना**ति पुथुज्जनेहि असाधारणेन।

७. अनवत्थितसुत्तवण्णना

१०२. सत्तमे **अनोधिं करित्वा**ति ''एत्तकाव सङ्खारा अनिच्चा, न इतो परे''ति एवं सीमं मरियादं अकत्वा। **अनवत्थिता**ति अवत्थिताय रहिता, भिज्जमानाव हुत्वा उपट्ठहिस्सन्तीति अत्थो। **सब्बलोके**ति सकले तेधातुके। **सामञ्ञेना**ति समणभावेन, अरियमग्गेनाति अत्थो।

८. उक्खित्तासिकसुत्तवण्णना

१०३. अट्ठमे **मेत्तावतताया**ति मेत्तायुत्ताय पारिचरियाय। सत्त हि सेखा तथागतं मेत्तावताय परिचरन्ति, खीणासवो परिचिण्णसत्थुको।

९. अतम्मयसुत्तवण्णना

१०४. नवमे **अतम्मयो**ति तम्मया वुच्चन्ति तण्हादिट्ठियो, ताहि रहितो। **अहंकारा**ति अहंकारदिट्ठि। **ममंकारा**ति ममंकारतण्हा। सेसं सब्बत्थ उत्तानमेवाति।

आनिसंसवग्गो दसमो।

दुतियपण्णासकं निट्ठितं।

११. तिकवग्गो

१. रागसुत्तवण्णना

१०७. एकादसमस्स पठमे **असुभा**ति असुभकम्मट्ठानं। **मेत्ता**ति मेत्ताकम्मट्ठानं। **पञ्ञा**ति सहविपस्सना मग्गपञ्ञा।

६. अस्सादसुत्तवण्णना

११२. छट्ठे **अस्साददिट्ठी**ति सस्सतदिट्ठि। **अत्तानुदिट्ठी**ति अत्तानं अनुगता वीसतिवत्थुका सक्कायदिट्ठि। **मिच्छादिट्ठी**ति द्वासट्ठिविधापि दिट्ठि। **सम्मादिट्ठी**ति मग्गसम्मादिट्ठि, नत्थि दिन्नन्तिआदिका वा मिच्छादिट्ठि, कम्मस्सकतञाणं सम्मादिट्ठि।

७. अरतिसुत्तवण्णना

११३. सत्तमे **अधम्मचरिया**ति दस अकुसलकम्मपथा।

१०. उद्धच्चसुत्तवण्णना

११६. दसमे **असंवरो**ति अनधिवासकभावो। सेसं सब्बत्थ उत्तानमेवाति।

तिकवग्गो एकादसमो।

१२. सामञ्ञवग्गवण्णना

११९-१२१. इतो परेसु **तपुस्सो**ति द्वेवाचिकुपासको। **तथागते निट्ठङ्गतो**ति बुद्धगुणेसु पतिट्ठितचित्तो पहीनकङ्खो। अमतं अद्दसाति **अमतद्दसो। अरियेना**ति निद्दोसेन लोकुत्तरसीलेन। **ञाणेना**ति पच्चवेक्खणञाणेन। **विमुत्तिया**ति सेखफलविमुत्तिया। **तवकण्णिको**ति एवंनामको गहपति। तपकण्णिकोतिपि पाळि।

२४. रागपेय्यालवण्णना

१४०. रागस्साति पञ्चकामगुणिकरागस्स। सेसं सब्बत्थ उत्तानत्थमेवाति।

मनोरथपूरणिया अङ्गुत्तरनिकाय-अट्ठकथाय

छक्कनिपातस्स संवण्णना निट्ठिता।

॥ नमो तस्स भगवतो अरहतो सम्मासम्बुद्धस्स॥

अङ्गुत्तरनिकाये

सत्तकनिपात-अट्ठकथा

पण्णासकं

१. धनवग्गो

१-५. पठमपियसुत्तादिवण्णना

१-५. सत्तकनिपातस्स पठमे **अनवञ्ञत्तिकामो**ति अभिञ्ञातभावकामो। ततिये **योनिसो विचिने धम्म**न्ति उपायेन चतुसच्चधम्मं विचिनाति। **पञ्ञायत्थं विपस्सती**ति सहविपस्सनाय मग्गपञ्ञाय सच्चधम्मं विपस्सति। **पज्जोतस्सेवा**ति दीपस्सेव। **विमोक्खो होति चेतसो**ति तस्स इमेहि बलेहि समन्नागतस्स खीणासवस्स दीपनिब्बानं विय चरिमकचित्तस्स वत्थारम्मणेहि विमोक्खो होति, गतट्ठानं न पञ्ञायति। चतुत्थे **सद्धो होती**तिआदीनि पञ्चकनिपाते वण्णितानेव। पञ्चमे **धनानी**ति अदालिद्दियकरणट्ठेन धनानि।

७. उग्गसुत्तवण्णना

७. सत्तमे **उग्गो राजमहामत्तो**ति पसेनदिकोसलस्स महाअमच्चो। **उपसङ्कमी**ति भुत्तपातरासो उपसङ्कमि। **अड्ढो**ति निधानगतेन धनेन अड्ढो। **मिगारो रोहणेय्यो**ति रोहणसेट्ठिनो नत्तारं मिगारसेट्ठिं सन्धायेवमाह। **महद्धनो**ति वळञ्जनधनेन महद्धनो। **महाभोगो**ति उपभोगपरिभोगभण्डस्स महन्तताय महाभोगो। **हिरञ्ञस्सा**ति सुवण्णस्सेव। सुवण्णामेव हिस्स कोटिसङ्ख्यं अहोसि। **रूपियस्सा**ति सेसस्स तट्टकसरकअत्थरणपावुरणादिनो परिभोगपरिक्खारस्स पमाणसङ्खाने वादोयेव नत्थि।

८. संयोजनसुत्तवण्णना

८. अट्ठमे **अनुनयसंयोजन**न्ति कामरागसंयोजनं। सब्बानेव चेतानि बन्धनट्ठेन संयोजनानीति वेदितब्बानि। इमस्मिं सुत्ते वट्टमेव कथितं। सेसं सब्बत्थ उत्तानत्थमेवाति।

धनवग्गो पठमो।

२. अनुसयवग्गो

३. कुलसुत्तवण्णना

१३. दुतियस्स ततिये **नालन्**ति न युत्तं नानुच्छविकं। **न मनापेना**ति न मनम्हि अप्पनकेन आकारेन निसिन्नासनतो पच्चुट्ठेन्ति, अनादरमेव दस्सेन्ति। **सन्तमस्स परिगुहन्ती**ति विज्जमानम्पि देय्यधम्मं एतस्स निगुहन्ति पटिच्छादेन्ति। **असक्कच्चं देन्ति नो सक्कच्च**न्ति लूखं वा होतु पणीतं वा, असहत्था अचित्तीकारेन देन्ति, नो चित्तीकारेन।

४. पुग्गलसुत्तवण्णना

१४. चतुत्थे **उभतोभागविमुत्तो**ति द्वीहि भागेहि विमुत्तो, अरूपसमापत्तिया रूपकायतो विमुत्तो, मग्गेन नामकायतो। सो चतुन्नं अरूपसमापत्तीनं एकेकतो वुट्ठाय सङ्खारे सम्मसित्वा अरहत्तं पत्तानं चतुन्नं, निरोधा वुट्ठाय अरहत्तं पत्तअनागामिनो च वसेन पञ्चविधो होति। पाळि पनेत्थ ''कतमो च पुग्गलो उभतोभागविमुत्तो? इधेकच्चो पुग्गलो अट्ठ विमोक्खे कायेन फुसित्वा विहरति, पञ्ञाय चस्स दिस्वा आसवा परिक्खीणा होन्ती''ति (पु॰ प॰ २०८) एवं अट्ठविमोक्खलाभिनो वसेन आगता।

पञ्ञाय विमुत्तोति **पञ्ञाविमुत्तो**। सो सुक्खविपस्सको, चतूहि झानेहि वुट्ठाय अरहत्तं पत्ता चत्तारो चाति इमेसं वसेन पञ्चविधो होति। पाळि पनेत्थ अट्ठविमोक्खपटिक्खेपवसेनेव आगता। यथाह – ''न हेव खो अट्ठ विमोक्खे कायेन फुसित्वा विहरति, पञ्ञाय चस्स दिस्वा आसवा परिक्खीणा होन्ति। अयं वुच्चति पुग्गलो पञ्ञाविमुत्तो''ति।

फुट्ठन्तं सच्छिकतोति **कायसक्खी**। सो झानफस्सं पठमं फुसति, पच्छा निरोधं निब्बानं सच्छिकरोति। सो सोतापत्तिफलट्ठं आदिं कत्वा याव अरहत्तमग्गट्ठा छब्बिधो होति। तेनाह – ''इधेकच्चो पुग्गलो अट्ठ विमोक्खे कायेन फुसित्वा विहरति, पञ्ञाय चस्स दिस्वा एकच्चे आसवा परिक्खीणा होन्ति। अयं वुच्चति पुग्गलो कायसक्खी''ति (पु॰ प॰ २०८)।

दिट्ठन्तं पत्तोति **दिट्ठिप्पत्तो**। तत्रिदं सङ्खेपलक्खणं – दुक्खा सङ्खारा, सुखो निरोधोति ञातं होति दिट्ठं विदितं सच्छिकतं फुसितं पञ्ञायाति दिट्ठिप्पत्तो। वित्थारतो पन सोपि कायसक्खी विय छब्बिधो होति। तेनेवाह – ''इधेकच्चो पुग्गलो 'इदं दुक्ख'न्ति यथाभूतं पजानाति…पे॰… 'अयं दुक्खनिरोधगामिनी पटिपदा'ति यथाभूतं पजानाति, तथागतप्पवेदिता चस्स धम्मा पञ्ञाय वोदिट्ठा होन्ति वोचरिता पञ्ञाय…पे॰… अयं वुच्चति पुग्गलो दिट्ठिप्पत्तो''ति।

सद्धाय विमुत्तोति **सद्धाविमुत्तो**। सोपि वुत्तनयेनेव छब्बिधो होति। तेनाह – ''इधेकच्चो पुग्गलो 'इदं दुक्ख'न्ति यथाभूतं पजानाति…पे॰… 'अयं दुक्खनिरोधगामिनी पटिपदा'ति यथाभूतं पजानाति, तथागतप्पवेदिता चस्स धम्मा पञ्ञाय वोदिट्ठा होन्ति वोचरिता पञ्ञाय…पे॰… नो च खो यथादिट्ठिप्पत्तस्स। अयं वुच्चति पुग्गलो सद्धाविमुत्तो''ति। एतस्स हि सद्धाविमुत्तस्स पुब्बभागमग्गक्खणे सद्दहन्तस्स विय ओकप्पेन्तस्स विय अधिमुच्चन्तस्स विय च किलेसक्खयो होति, दिट्ठिप्पत्तस्स पुब्बभागमग्गक्खणे किलेसच्छेदकञाणं अदन्धं तिखिणं सूरं हुत्वा वहति। तस्मा यथा नाम नातितिखिणेन असिना कदलिं छिन्दन्तस्स छिन्नट्ठानं मट्ठं न होति, असि सीघं न वहति, सद्दो सुय्यति, बलवतरो वायामो कातब्बो होति, एवरूपा सद्धाविमुत्तस्स पुब्बभागमग्गभावना। यथा पन सुनिसितेन असिना कदलिं छिन्दन्तस्स छिन्नट्ठानं मट्ठं होति, असि

सीघं वहति, सद्दो न सुय्यति, बलववायामकिच्चं न होति, एवरूपा पञ्ञाविमुत्तस्स पुब्बभागमग्गभावना वेदितब्बा।

धम्मं अनुस्सरतीति **धम्मानुसारी**। धम्मोति पञ्ञा, पञ्ञापुब्बङ्गमं मग्गं भावेतीति अत्थो। **सद्धानुसारिम्हि**पि एसेव नयो। उभोपेते सोतापत्तिमग्गट्ठायेव। वुत्तम्पि चेतं – ''यस्स पुग्गलस्स सोतापत्तिफलसच्छिकिरियाय पटिपन्नस्स पञ्ञिन्द्रियं अधिमत्तं होति, पञ्ञावाहिं पञ्ञापुब्बङ्गमं अरियमग्गं भावेति। अयं वुच्चति पुग्गलो धम्मानुसारी। यस्स पुग्गलस्स सोतापत्तिफलसच्छिकिरियाय पटिपन्नस्स सद्धिन्द्रियं अधिमत्तं होति, सद्धावाहिं सद्धापुब्बङ्गमं अरियमग्गं भावेति। अयं वुच्चति पुग्गलो सद्धानुसारी''ति (पु॰ प॰ २०८)। अयमेत्थ सङ्खेपो, वित्थारतो पनेसा उभतोभागविमुत्तादिकथा विसुद्धिमग्गे (विसुद्धि॰ २.७७१, ८८९) पञ्ञाभावनाधिकारे वुत्ता। तस्मा तत्थ वुत्तनयेनेव वेदितब्बाति।

५. उदकूपमासुत्तवण्णना

१५. पञ्चमे **उदकूपमा**ति निमुज्जनादिआकारं गहेत्वा उदकेन उपमिता। **सकिं निमुग्गो**ति एकवारमेव निमुग्गो। **एकन्तकाळकेही**ति नियतमिच्छादिट्ठिं सन्धाय वुत्तं। **उम्मुज्जती**ति उट्ठहति। **साधू**ति सोभना भद्दका। **हायतियेवा**ति चङ्कवारे आसित्तउदकं विय परिहायतेव। **उम्मुज्जित्वा विपस्सति विलोकेती**ति उट्ठहित्वा गन्तब्बदिसं विपस्सति विलोकेति। **पतरती**ति गन्तब्बदिसाभिमुखो तरति नाम। **पटिगाधप्पत्तो होती**ति उट्ठाय विलोकेत्वा पतरित्वा एकस्मिं ठाने पतिट्ठापत्तो नाम होति, तिट्ठति न पुनागच्छति। **तिण्णो पारङ्गतो थले तिट्ठती**ति सब्बकिलेसोघं तरित्वा परतीरं गन्त्वा निब्बानथले पतिट्ठितो नाम होति। इमस्मिं सुत्ते वट्टविवट्टं कथितं।

६. अनिच्चानुपस्सीसुत्तवण्णना

१६. छट्ठे अनिच्चाति एवं पञ्ञाय फरन्तो अनुपस्सतीति **अनिच्चानुपस्सी**। अनिच्चाति एवं सञ्ञा अस्साति **अनिच्चसञ्ञी**। अनिच्चाति एवं ञाणेन पटिसंवेदिता अस्साति **अनिच्चपटिसंवेदी। सतत**न्ति सब्बकालं। **समित**न्ति यथा पुरिमचित्तेन पच्छिमचित्तं समितं समुपगतं घट्टितं होति, एवं। **अब्बोकिण्ण**न्ति निरन्तरं अञ्ञेन चेतसा असंमिस्सं। **चेतसा अधिमुच्चमानो**ति चित्तेन सन्निट्ठापयमानो। **पञ्ञाय परियोगाहमानो**ति विपस्सनाञाणेन अनुपविसमानो।

अपुब्बं अचरिमन्ति अपुरे अपच्छा एकक्खणेयेव। इध समसीसी कथितो। सो चतुब्बिधो होति रोगसमसीसी, वेदनासमसीसी, इरियापथसमसीसी, जीवितसमसीसीति। तत्थ यस्स अञ्ञतरेन रोगेन फुट्ठस्स सतो रोगवूपसमो च आसवक्खयो च एकप्पहारेनेव होति, अयं **रोगसमसीसी** नाम। यस्स पन अञ्ञतरं वेदनं वेदयतो वेदनावूपसमो च आसवक्खयो च एकप्पहारेनेव होति, अयं **वेदनासमसीसी** नाम। यस्स पन ठानादीसु इरियापथेसु अञ्ञतरसमङ्गिनो विपस्सन्तस्स इरियापथस्स परियोसानञ्च आसवक्खयो च एकप्पहारेनेव होति, अयं **इरियापथसमसीसी** नाम। यस्स पन उपक्कमतो वा सरसतो वा जीवितपरियादानञ्च आसवक्खयो च एकप्पहारेनेव होति, अयं **जीवितसमसीसी** नाम। अयमिध अधिप्पेतो। तत्थ किञ्चापि आसवपरियादानं मग्गचित्तेन, जीवितपरियादानं चुतिचित्तेन होतीति उभिन्नं एकक्खणे सम्भवो नाम नत्थि। यस्मा पनस्स आसवेसु खीणमत्तेसु पच्चवेक्खणवारानन्तरमेव जीवितपरियादानं गच्छति, अन्तरं न पञ्ञायति, तस्मा एवं वुत्तं।

अन्तरापरिनिब्बायीति यो पञ्चसु सुद्धावासेसु यत्थ कत्थचि उप्पन्नो निब्बत्तक्खणे वा थोकं अतिक्कमित्वा वा

वेमज्झे ठत्वा वा अरहत्तं पापुणाति, तस्सेतं नामं। **उपहच्चपरिनिब्बायी**ति यो तत्थेव आयुवेमज्झं अतिक्कमित्वा अरहत्तं पापुणाति। **असङ्खारपरिनिब्बायी**ति यो तेसंयेव पुग्गलानं असङ्खारेनेव अप्पयोगेन किलेसे खेपेति। **ससङ्खारपरिनिब्बायी**ति यो ससङ्खारेन सप्पयोगेन किलेसे खेपेति। **उद्धंसोतो अकनिट्ठगामी**ति यो हेट्ठा चतूसु सुद्धावासेसु यत्थ कत्थचि निब्बत्तित्वा ततो चुतो अनुपुब्बेन अकनिट्ठे उप्पज्जित्वा अरहत्तं पापुणाति।

७-९. दुक्खानुपस्सीसुत्तादिवण्णना

१७-१९. सत्तमे **दुक्खानुपस्सी**ति पीळनाकारं दुक्खतो अनुपस्सन्तो। अट्ठमे **अनत्तानुपस्सी**ति अवसवत्तनाकारं अनत्ताति अनुपस्सन्तो। नवमे **सुखानुपस्सी**ति सुखन्ति एवं ञाणेन अनुपस्सन्तो।

१०. निद्दसवत्थुसुत्तवण्णना

२०. दसमे **निद्दसवत्थूनी**ति निद्दसादिवत्थूनि, ''निद्दसो भिक्खु, निब्बीसो, नित्तिंसो, निच्चत्तालीसो, निप्पञ्ञासो''ति एवं वचनकारणानि। अयं किर पञ्हो तित्थियसमये उप्पन्नो। तित्थिया हि दसवस्सकाले मतं निगण्ठं निद्दसोति वदन्ति। सो किर पुन दसवस्सो न होति। न केवलञ्च दसवस्सो, नववस्सोपि एकवस्सोपि न होति। एतेनेव नयेन वीसतिवस्सादिकालेपि मतं निगण्ठं ''निब्बीसो नित्तिंसो निच्चत्तालीसो निप्पञ्ञासो''ति वदन्ति। आयस्मा आनन्दो गामे विचरन्तो तं कथं सुत्वा विहारं गन्त्वा भगवतो आरोचेसि। भगवा आह – ''न इदं, आनन्द, तित्थियानं अधिवचनं, मम सासने खीणासवस्सेतं अधिवचनं। खीणासवो हि दसवस्सकाले परिनिब्बुतो पुन दसवस्सो न होति। न केवलञ्च दसवस्सोव, नववस्सोपि…पे॰… एकवस्सोपि। न केवलञ्च एकवस्सोव, एकादसमासिकोपि…पे॰… एकमासिकोपि एकमुहुत्तिकोपि न होतियेव''। कस्मा? पुन पटिसन्धिया अभावा। निब्बीसादीसुपि एसेव नयो। इति भगवा ''मम सासने खीणासवस्सेतं अधिवचन''न्ति वत्वा येहि कारणेहि निद्दसो होति, तानि दस्सेतुं इमं देसनं आरभि।

तत्थ **इधा**ति इमस्मिं सासने। **सिक्खासमादाने तिब्बच्छन्दो होती**ति सिक्खात्तयपूरणे बलवच्छन्दो होति। **आयतिञ्च सिक्खासमादाने अविगतपेमो**ति अनागते पुनदिवसादीसुपि सिक्खापूरणे अविगतपेमेनेव समन्नागतो होति। **धम्मनिसन्तिया**ति धम्मनिसामनाय। विपस्सनायेतं अधिवचनं। **इच्छाविनये**ति तण्हाविनये। **पटिसल्लाने**ति एकीभावे। **वीरियारम्भे**ति कायिकचेतसिकस्स वीरियस्स पूरणे। **सतिनेपक्के**ति सतियञ्चेव निपकभावे। **दिट्ठिपटिवेधे**ति मग्गदस्सने। सेसं सब्बत्थ उत्तानमेवाति।

अनुसयवग्गो दुतियो।

३. वज्जिसत्तकवग्गो

१. सारन्ददसुत्तवण्णना

२१. ततियस्स पठमे **सारन्ददे चेतिये**ति एवंनामके विहारे। अनुप्पन्ने किर तथागते तत्थ सारन्ददस्स यक्खस्स निवासनट्ठानं चेतियं अहोसि, अथेत्थ भगवतो विहारं कारेसुं। सो सारन्ददचेतियंत्वेव सङ्ख्यं गतो। **यावकीवञ्चा**ति यत्तकं कालं। **अभिण्हं सन्निपाता**ति दिवसस्स तिक्खत्तुं सन्निपतन्तापि अन्तरन्तरा सन्निपतन्तापि अभिण्हं सन्निपाताव। **सन्निपातबहुला**ति ''हिय्योपि पुरिमदिवसम्पि सन्निपतम्ह, पुन अज्ज किमत्थं सन्निपतामा''ति वोसानमनापज्जनेन

सन्निपातबहुला। **वुड्ढियेव लिच्छवी वज्जीनं पाटिकङ्खा नो परिहानी**ति अभिण्हं असन्निपतन्ता हि दिसासु आगतं सासनं न सुणन्ति, ततो ''असुकगामसीमा वा निगमसीमा वा आकुला, असुकट्ठाने चोरा परियुट्ठिता''ति न जानन्ति। चोरापि ''पमत्ता राजानो''ति ञत्वा गामनिगमादीनि पहरन्ता जनपदं नासेन्ति। एवं राजूनं परिहानि होति। अभिण्हं सन्निपतन्ता पन तं पवत्तिं सुणन्ति, ततो बलं पेसेत्वा अमित्तमद्दनं करोन्ति। चोरापि ''अप्पमत्ता राजानो, न सक्का अम्हेहि वग्गबन्धनेन विचरितु''न्ति भिज्जित्वा पलायन्ति। एवं राजूनं वुड्ढि होति। तेन वुत्तं – ''वुड्ढियेव लिच्छवी वज्जीनं पाटिकङ्खा नो परिहानी''ति।

समग्गातिआदीसु सन्निपातभेरिया निग्गताय ''अज्ज मे किच्चं अत्थि मङ्गलं अत्थी''ति विक्खेपं करोन्ता न समग्गा सन्निपतन्ति नाम। भेरिसद्दं पन सुत्वाव भुञ्जमानापि अलङ्करुमानापि वत्थानि निवासयमानापि अद्धभुत्ता अद्धालङ्कता वत्थं निवासेन्ताव सन्निपतन्ता **समग्गा सन्निपतन्ति** नाम। सन्निपतिता पन चिन्तेत्वा मन्तेत्वा कत्तब्बं कत्वा एकतोव अवुट्ठहन्ता न समग्गा वुट्ठहन्ति नाम। एवं वुट्ठितेसु हि ये पठमं गच्छन्ति, तेसं एवं होति – ''अम्हेहि बाहिरकथाव सुता, इदानि विनिच्छयकथा भविस्सती''ति। एकतो वुट्ठहन्ता पन **समग्गा वुट्ठहन्ति** नाम। अपिच ''असुकट्ठाने गामसीमा वा निगमसीमा वा आकुला, चोरा वा परियुट्ठिता''ति सुत्वा ''को गन्त्वा अमित्तमद्दनं करिस्सती''ति वुत्ते ''अहं पठमं अहं पठम''न्ति वत्वा गच्छन्तापि समग्गा वुट्ठहन्ति नाम। एकस्स पन कम्मन्ते ओसीदमाने सेसा पुत्तभातरो पेसेत्वा तस्स कम्मन्तं उपत्थम्भयमानापि आगन्तुकराजानं ''असुकस्स गेहं गच्छतु, असुकस्स गेहं गच्छतू''ति अवत्वा सब्बे एकतो सङ्गण्हन्तापि एकस्स मङ्गले वा रोगे वा अञ्ञस्मिं वा पन तादिसे सुखदुक्खे उप्पन्ने सब्बे तत्थ सहायभावं गच्छन्तापि **समग्गा वज्जिकरणीयानि करोन्ति** नाम।

अप्पञ्ञत्तन्तिआदीसु पुब्बे अकतं सुङ्कं वा बलिं वा दण्डं वा आहरापेन्ता **अप्पञ्ञत्तं पञ्ञापेन्ति** नाम। पोराणपवेणिया आगतमेव पन अनाहरापेन्ता **पञ्ञत्तं समुच्छिन्दन्ति** नाम। चोरोति गहेत्वा दस्सिते अविचिनित्वा छेज्जभेज्जं अनुसासन्ता पोराणं वज्जिधम्मं समादाय न वत्तन्ति नाम। तेसं अपञ्ञत्तं पञ्ञापेन्तानं अभिनवसुङ्कादिपीळिता मनुस्सा ''अतिउपद्दुतम्ह, के इमेसं विजिते वसिस्सन्ती''ति पच्चन्तं पविसित्वा चोरा वा चोरसहाया वा हुत्वा जनपदं हनन्ति। पञ्ञत्तं समुच्छिन्दन्तानं पवेणिआगतानि सुङ्कादीनि अगण्हन्तानं कोसो परिहायति, ततो हत्थिअस्सबलकायओरोधादयो यथानिबद्धं वट्टं अलभमाना थामबलेन परिहायन्ति। ते नेव युद्धक्खमा होन्ति न पारिचरियक्खमा। पोराणं वज्जिधम्मं समादाय अवत्तन्तानं विजिते मनुस्सा ''अम्हाकं पुत्तं पितरं भातरं अचोरंयेव चोरोति कत्वा छिन्दिंसु भिन्दिंसू''ति कुज्झित्वा पच्चन्तं पविसित्वा चोरा वा चोरसहाया वा हुत्वा जनपदं हनन्ति। एवं राजूनं परिहानि होति। अपञ्ञत्तं न पञ्ञापेन्तानं पन ''पवेणिआगतंयेव राजानो करोन्ती''ति मनुस्सा हट्ठतुट्ठा कसिवाणिज्जादिके कम्मन्ते सम्पादेन्ति। पञ्ञत्तं असमुच्छिन्दन्तानं पवेणिआगतानि सुङ्कादीनि गण्हन्तानं कोसो वड्ढति, ततो हत्थिअस्सबलकायओरोधादयो यथानिबद्धं वट्टं लभमाना थामबलसम्पन्ना युद्धक्खमा चेव पारिचरियक्खमा च होन्ति। पोराणे वज्जिधम्मे समादाय वत्तन्तानं मनुस्सा न उज्झायन्ति। ''राजानो पोराणपवेणिया करोन्ति, अट्ठकुलिकसेनापतिउपराजूहि परिक्खितं सयम्पि परिक्खिपित्वा पवेणिपोत्थकं वाचापेत्वा अनुच्छविकमेव दण्डं पवत्तयन्ति, एतेसं दोसो नत्थि, अम्हाकंयेव दोसो''ति अप्पमत्ता कम्मन्ते करोन्ति। एवं राजूनं वुड्ढि होति।

सक्करिस्सन्तीति यंकिञ्चि तेसं सक्कारं करोन्ता सुन्दरमेव करिस्सन्ति। **गरुं करिस्सन्ती**ति गरुभावं पच्चुपट्ठपेत्वा करिस्सन्ति। **मानेस्सन्ती**ति मनेन पियायिस्सन्ति। **पूजेस्सन्ती**ति पच्चयपूजाय पूजेस्सन्ति। **सोतब्बं मञ्ञिस्सन्ती**ति दिवसस्स द्वे तयो वारे उपट्ठानं गन्त्वा तेसं कथं सोतब्बं सद्धातब्बं मञ्ञिस्सन्ति। तत्थ ये एवं महल्लकानं राजूनं

सक्कारादीनि न करोन्ति, ओवादत्थाय वा नेसं उपट्ठानं न गच्छन्ति, ते तेहि विस्सट्ठा अनोवदियमाना कीळापसुता रज्जतो परिहायन्ति। ये पन तथा पटिपज्जन्ति, तेसं महल्लकराजानो ''इदं कातब्बं इदं न कातब्ब''न्ति पोराणपवेणिं आचिक्खन्ति। सङ्गामं पत्वापि ''एवं पविसितब्बं, एवं निक्खमितब्ब''न्ति उपायं दस्सेन्ति। ते तेहि ओवदियमाना यथाओवादं पटिपज्जमाना सक्कोन्ति रज्जपवेणिं सन्धारेतुं। तेन वुत्तं – ''वुद्धियेव लिच्छवी वज्जीनं पाटिकङ्खा''ति।

कुलित्थियोति कुलघरणियो। **कुलकुमारियो**ति अनिविद्धा तासं धीतरो। **ओकस्सा**ति वा **पसय्हा**ति वा पसय्हाकारस्सेवेतं नामं। ओकासातिपि पठन्ति। तत्थ **ओकस्सा**ति अवकसित्वा आकड्ढित्वा। **पसय्हा**ति अभिभवित्वा अज्झोत्थरित्वाति अयं वचनत्थो। एवञ्हि करोन्तानं विजिते मनुस्सा ''अम्हाकं गेहे पुत्तभातरोपि, खेळसिङ्घानिकादीनि मुखेन अपनेत्वा संवड्ढिता धीतरोपि इमे बलक्कारेन गहेत्वा अत्तनो घरे वासेन्ती''ति कुपिता पच्चन्तं पविसित्वा चोरा वा चोरसहाया वा हुत्वा जनपदं हनन्ति। एवं अकरोन्तानं पन विजिते मनुस्सा अप्पोस्सुक्का सकानि कम्मानि करोन्ता राजकोसं वड्ढेन्ति। एवमेत्थ वुद्धिहानियो वेदितब्बा।

वज्जीनं वज्जिचेतियानीति वज्जिराजूनं वज्जिरट्ठे चित्तीकतट्ठेन चेतियानीति लद्धनामानि यक्खट्ठानानि। **अब्भन्तरानी**ति अन्तोनगरे ठितानि। **बाहिरानी**ति बहिनगरे ठितानि। **दिन्नपुब्बं कतपुब्ब**न्ति पुब्बे दिन्नञ्च कतञ्च। **नो परिहापेस्सन्ती**ति अहापेत्वा यथापवत्तमेव करिस्सन्ति। धम्मिकं बलिं परिहापेन्तानञ्हि देवता आरक्खं सुसंविहितं न करोन्ति, अनुप्पन्नं दुक्खं उप्पादेतुं असक्कोन्तियोपि उप्पन्नं काससीसरोगादिं वड्ढेन्ति, सङ्गामे पत्ते सहाया न होन्ति। अपरिहापेन्तानं पन आरक्खं सुसंविहितं करोन्ति, अनुप्पन्नं सुखं उप्पादेतुं असक्कोन्तियोपि उप्पन्नं काससीसरोगादिं हरन्ति, सङ्गामसीसे सहाया होन्तीति। एवमेत्थ वुद्धिहानियो वेदितब्बा।

धम्मिका रक्खावरणगुत्तीति एत्थ रक्खा एव यथा अनिच्छितं नागच्छति, एवं आवरणतो आवरणं। यथा इच्छितं न नस्सति, एवं गोपायनतो गुत्ति। तत्थ बलकायेन परिवारेत्वा रक्खनं पब्बजितानं धम्मिका रक्खावरणगुत्ति नाम न होति। यथा पन विहारस्स उपवने रुक्खे न छिन्दन्ति, वाजिका वाजं न करोन्ति, पोक्खरणीसु मच्छे न गण्हन्ति, एवं करणं धम्मिका रक्खावरणगुत्ति नाम। **किन्ती**ति केन नु खो कारणेन।

तत्थ ये अनागतानं अरहन्तानं आगमनं न इच्छन्ति, ते अस्सद्धा होन्ति अप्पसन्ना। पब्बजिते सम्पत्ते पच्चुग्गमनं न करोन्ति, गन्त्वा न पस्सन्ति, पटिसन्थारं न करोन्ति, पञ्हं न पुच्छन्ति, धम्मं न सुणन्ति, दानं न देन्ति, अनुमोदनं न सुणन्ति, निवासनट्ठानं न संविदहन्ति। अथ नेसं अवण्णो उग्गच्छति ''असुको नाम राजा अस्सद्धो अप्पसन्नो, पब्बजिते सम्पत्ते पच्चुग्गमनं न करोति...पे॰... निवासनट्ठानं न संविदहती''ति। तं सुत्वा पब्बजिता तस्स नगरद्वारेन गच्छन्तापि नगरं न पविसन्ति। एवं अनागतानं अरहन्तानं अनागमनमेव होति। आगतानं पन फासुविहारे असति येपि अजानित्वा आगता, ते ''वसिस्सामाति ताव चिन्तेत्वा आगतम्हा, इमेसं पन राजूनं इमिना नीहारेन के वसिस्सन्ती''ति निक्खमित्वा गच्छन्ति। एवं अनागतेसु अनागच्छन्तेसु आगतेसु दुक्खं विहरन्तेसु सो दोसो पब्बजितानं अनावासो होति। ततो देवतारक्खा न होति, देवतारक्खाय असति अमनुस्सा ओकासं लभन्ति, अमनुस्सा उस्सन्ना अनुप्पन्नं ब्याधिं उप्पादेन्ति। सीलवन्तानं दस्सनपञ्हपुच्छनादिवत्थुकस्स पुञ्ञस्स अनागमो होति। विपरियायेन यथावुत्तकण्हपक्खविपरीतस्स सुक्कपक्खस्स सम्भवो होतीति एवमेत्थ वुद्धिहानियो वेदितब्बा।

२. वस्सकारसुत्तवण्णना

२२. दुतिये **अभियातुकामो**ति अभिभवनत्थाय यातुकामो। **वज्जी**ति वज्जिराजानो। **एवंमहिद्धिके**ति एवं महतिया राजिद्धिया समन्नागते। एतेन नेसं समग्गभावं कथेति। **एवंमहानुभावे**ति एवं महन्तेन राजानुभावेन समन्नागते। एतेन नेसं हत्थिसिप्पादीसु कतसिक्खतं कथेति, यं सन्धाय वुत्तं – ''सिक्खिता वतिमे लिच्छविकुमारका, सुसिक्खिता वतिमे लिच्छविकुमारका, यत्र हि नाम सुखुमेन ताळच्छिग्गळेन असनं अतिपातयिस्सन्ति पोङ्खानुपोङ्खं अविराधित''न्ति (सं० नि० ५.१११५)। **उच्छेच्छामी**ति उच्छिन्दिस्सामि। **विनासेस्सामी**ति अदस्सनं नयिस्सामि। **अनयब्यसन**न्ति अवड्ढिञ्चेव, ञातिब्यसनञ्च। **आपादेस्सामी**ति पापयिस्सामि।

इति किर सो ठाननिसज्जादीसु इमं युद्धकथमेव कथेति, ''गमनसज्जा होथा''ति च बलकायं आणापेति। कस्मा? गङ्गाय किर एकं पट्टनगामं निस्साय अड्ढयोजनं अजातसत्तुनो विजितं, अड्ढयोजनं लिच्छवीनं। तत्र पब्बतपादतो महग्घभण्डं ओतरति। तं सुत्वा ''अज्ज यामि, स्वे यामी''ति अजातसत्तुनो संविदहन्तस्सेव लिच्छविनो समग्गा सम्मोदमाना पुरेतरं आगन्त्वा सब्बं गण्हन्ति। अजातसत्तु पच्छा आगन्त्वा तं पवत्तिं ञत्वा कुज्झित्वा गच्छति। ते पुनसंवच्छरेपि तथेव करोन्ति। अथ सो बलवाघातजातो, तदा एवमकासि।

ततो चिन्तेसि – ''गणेन सद्धिं युद्धं नाम भारियं, एकोपि मोघप्पहारो नाम नत्थि। एकेन खो पन पण्डितेन सद्धिं मन्तेत्वा करोन्तो निरपराधो होति, पण्डितो च सत्थारा सदिसो नत्थि, सत्था च अविदूरे धुरविहारे वसति, हन्दाहं पेसेत्वा पुच्छामि। सचे मे गतेन कोचि अत्थो भविस्सति, सत्था तुण्ही भविस्सति। अनत्थे पन सति 'किं रञ्ञो तत्थ गतेना'ति वक्खती''ति। सो वस्सकारं ब्राह्मणं पेसेसि। ब्राह्मणो गन्त्वा भगवतो तमत्थं आरोचेसि। तेन वुत्तं – **अथ खो राजा...पे०... आपादेस्सामि वज्जी**ति।

भगवन्तं बीजयमानोति थेरो वत्तसीसे ठत्वा भगवन्तं बीजति, भगवतो पन सीतं वा उण्हं वा नत्थि। भगवा ब्राह्मणस्स वचनं सुत्वा तेन सद्धिं अमन्तेत्वा थेरेन सद्धिं मन्तेतुकामो **किन्ति ते, आनन्द, सुत**न्तिआदिमाह। तं वुत्तत्थमेव।

एकमिदाहन्ति इदं भगवा पुब्बे वज्जीनं इमस्स वज्जिसत्तकस्स देसितभावप्पकासनत्थं आह। **अकरणीया**ति अकत्तब्बा, अग्गहेतब्बाति अत्थो। **यदिद**न्ति निपातमत्तं। **युद्धस्सा**ति करणत्थे सामिवचनं, अभिमुखं युद्धेन गहेतुं न सक्काति अत्थो। **अञ्ञत्र उपलापनाया**ति ठपेत्वा उपलापनं। उपलापना नाम ''अलं विवादेन, इदानि समग्गा होमा''ति हत्थिअस्सरथहिरञ्ञसुवण्णादीनि पेसेत्वा सङ्गहकरणं, एवञ्हि सङ्गहं कत्वा केवलं विस्सासेन सक्का गण्हितुन्ति अत्थो। **अञ्ञत्र मिथुभेदा**ति ठपेत्वा मिथुभेदं। इमिना ''अञ्ञमञ्ञभेदं कत्वापि सक्का एते गहेतु''न्ति दस्सेति। इदं ब्राह्मणो भगवतो कथाय नयं लभित्वा आह। किं पन भगवा ब्राह्मणस्स इमाय कथाय नयलाभं जानातीति? आम जानाति। जानन्तो कस्मा कथेसि? अनुकम्पाय। एवं किरस्स अहोसि – ''मया अकथितेपि कतिपाहेन गन्त्वा सब्बे गण्हिस्सति, कथिते पन समग्गे भिन्दन्तो तीहि संवच्छरेहि गण्हिस्सति। एत्तकम्पि जीवितमेव वरं। एत्तकञ्हि जीवन्ता अत्तनो पतिट्ठाभूतं पुञ्ञं करिस्सन्ती''ति। **अभिनन्दित्वा**ति चित्तेन नन्दित्वा। **अनुमोदित्वा**ति ''याव सुभासितमिदं भोता गोतमेना''ति वाचाय अनुमोदित्वा। **पक्कामी**ति रञ्ञो सन्तिकं गतो। राजापि तमेव पेसेत्वा सब्बे भिन्दित्वा गन्त्वा अनयब्यसनं पापेसि।

३. पठमसत्तकसुत्तवण्णना

२३. ततिये **अभिण्हं सन्निपाता**ति इदं वज्जिसत्तके वुत्तसदिसमेव। इधापि च अभिण्हं असन्निपतन्ता दिसासु

आगतसासनं न सुणन्ति, ततो ''असुकविहारसीमा आकुला, उपोसथप्पवारणा ठिता, असुकस्मिं ठाने भिक्खू वेज्जकम्मदूतकम्मादीनि करोन्ति, विञ्ञत्तिबहुला फलपुप्फदानादीहि जीविकं कप्पेन्ती''तिआदीनि न जानन्ति। पापभिक्खूपि ''पमत्तो सङ्घो''ति ञत्वा रासिभूता सासनं ओसक्कापेन्ति। अभिण्हं सन्निपतन्ता पन तं पवत्तिं सुणन्ति, ततो भिक्खुसङ्घं पेसेत्वा सीमं उजुं कारेन्ति, उपोसथप्पवारणायो पवत्तापेन्ति, मिच्छाजीवानं उस्सन्नट्ठाने अरियवंसिके पेसेत्वा अरियवंसं कथापेन्ति, पापभिक्खूनं विनयधरेहि निग्गहं कारापेन्ति। पापभिक्खूपि ''अप्पमत्तो सङ्घो, न सक्का अम्हेहि वग्गबन्धनेन विचरितु''न्ति भिज्जित्वा पलायन्ति। एवमेत्थ वुड्ढिहानियो वेदितब्बा।

समग्गातिआदीसु चेतियपटिजग्गनत्थं वा बोधिघरउपोसथागारच्छादनत्थं वा कतिकवत्तं वा ठपेतुकामताय ''सङ्घो सन्निपततू''ति भेरिया वा घण्टिया वा आकोटितमत्ताय ''मय्हं चीवरकम्मं अत्थि, मय्हं पत्तो पचितब्बो, मय्हं नवकम्मं अत्थी''ति विक्खेपं करोन्ता न समग्गा सन्निपतन्ति नाम। सब्बं पन तं कम्मं ठपेत्वा ''अहं पुरिमतरं, अहं पुरिमतर''न्ति एकप्पहारेनेव सन्निपतन्ता समग्गा सन्निपतन्ति नाम। सन्निपतिता पन चिन्तेत्वा मन्तेत्वा कत्तब्बं कत्वा एकतोव अवुट्ठहन्ता न समग्गा वुट्ठहन्ति नाम। एवं वुट्ठितेसु हि ये पठमं गच्छन्ति, तेसं एवं होति ''अम्हेहि बाहिरकथाव सुता, इदानि विनिच्छयकथा भविस्सती''ति। एकप्पहारेनेव वुट्ठहन्ता समग्गा वुट्ठहन्ति नाम। अपिच ''असुकट्ठाने विहारसीमा आकुला, उपोसथप्पवारणा ठिता, असुकट्ठाने वेज्जकम्मादिकारका पापभिक्खू उस्सन्ना''ति सुत्वा ''को गन्त्वा तेसं निग्गहं करिस्सती''ति वुत्ते ''अहं पठमं, अहं पठम''न्ति वत्वा गच्छन्तापि समग्गा वुट्ठहन्ति नाम।

आगन्तुकं पन दिस्वा ''इमं परिवेणं याहि, एतं परिवेणं याहि, अयं को''ति अवत्वा सब्बे वत्तं करोन्तापि, जिण्णपत्तचीवरकं दिस्वा तस्स भिक्खाचारवत्तेन पत्तचीवरं परियेसन्तापि, गिलानस्स गिलानभेसज्जं परियेसमानापि, गिलानमेव अनाथं ''असुकपरिवेणं याही''ति अवत्वा अत्तनो अत्तनो परिवेणे पटिजग्गन्तापि, एको ओलीयमानको गन्थो होति, पञ्ञवन्तं भिक्खुं सङ्गण्हित्वा तेन तं गन्थं उक्खिपापेन्तापि समग्गा सङ्घकरणीयानि करोन्ति नाम।

अप्पञ्ञत्तन्तिआदीसु नवं अधम्मिकं कतिकवत्तं वा सिक्खापदं वा गण्हन्ता अप्पञ्ञत्तं पञ्ञापेन्ति नाम पुराणसन्थतवत्थुस्मिं सावत्थियं भिक्खू विय। उद्धम्मं उब्बिनयं सासनं दीपेन्ता पञ्ञत्तं समुच्छिन्दन्ति नाम, वस्ससतपरिनिब्बुते भगवति वेसालिका वज्जिपुत्तका विय। खुद्दानुखुद्दका पन आपत्तियो सञ्चिच्च वीतिक्कमन्ता यथापञ्ञत्तेसु सिक्खापदेसु समादाय न वत्तन्ति नाम अस्सजिपुनब्बसुका विय। तथा अकरोन्ता पन अपञ्ञत्तं न पञ्ञापेन्ति, पञ्ञत्तं न समुच्छिन्दन्ति, यथापञ्ञत्तेसु सिक्खापदेसु समादाय वत्तन्ति नाम आयस्मा उपसेनो विय, आयस्मा यसो काकण्डकपुत्तो विय, आयस्मा महाकस्सपो विय च। **वुद्धियेवा**ति सीलादिगुणेहि वुद्धियेव, नो परिहानि।

थेराति थिरभावप्पत्ता थेरकारकेहि गुणेहि समन्नागता। बहू रत्तियो जानन्तीति **रत्तञ्ञू**। चिरं पब्बजितानं एतेसन्ति **चिरपब्बजिता**। सङ्घस्स पितिट्ठाने ठिताति **सङ्घपितरो**। पितिट्ठाने ठितत्ता सङ्घं परिणेन्ति, पुब्बङ्गमा हुत्वा तीसु सिक्खासु पवत्तेन्तीति **सङ्घपरिणायका**।

ये तेसं सक्कारादीनि न करोन्ति, ओवादत्थाय द्वे तयो वारे उपट्ठानं न गच्छन्ति, तेपि तेसं ओवादं न देन्ति, पवेणिकथं न कथेन्ति, सारभूतं धम्मपरियायं न सिक्खापेन्ति। ते तेहि विस्सट्ठा सीलादीहि धम्मक्खन्धेहि सत्तहि च अरियधनेहीति एवमादीहि गुणेहि परिहायन्ति। ये पन तेसं सक्कारादीनि करोन्ति, उपट्ठानं गच्छन्ति, तेसं ते ''एवं ते अभिक्कमितब्ब''न्तिआदिकं ओवादं देन्ति, पवेणिकथं कथेन्ति, सारभूतं धम्मपरियायं सिक्खापेन्ति, तेरसहि धुतङ्गेहि दसहि कथावत्थूहि अनुसासन्ति। ते तेसं ओवादे ठत्वा सीलादीहि गुणेहि वड्ढमाना सामञ्ञत्थं अनुपापुणन्ति। एवमेत्थ

हानिवुड्ढियो दट्ठब्बा।

पुनब्भवो सीलमस्साति पोनोब्भविका, पुनब्भवदायिकाति अत्थो, तस्सा **पोनोब्भविकाय। न वसं गच्छिस्सन्ती**ति एत्थ ये चतुन्नं पच्चयानं कारणा उपट्ठाकानं पदानुपदिका हुत्वा गामतो गामं विचरन्ति, ते तस्सा वसं गच्छन्ति नाम। इतरे न गच्छन्ति। तत्थ हानिवुड्ढियो पाकटायेव।

आरञ्ञकेसूति पञ्चधनुसतिकपच्छिमेसु। **सापेक्खा**ति सालया। गामन्तसेनासनेसु हि झानं अप्पेत्वापि ततो वुट्ठितमत्तोव इत्थिपुरिसदारकदारिकादिसद्दं सुणाति, येनस्स अधिगतविसेसोपि हायतियेव। अरञ्ञसेनासने निद्दायित्वापि पबुद्धमत्तो सीहब्यग्घमोरादीनं सद्दं सुणाति, येन अरञ्ञे पीतिं पटिलभित्वा तमेव सम्मसन्तो अग्गफले पतिट्ठाति। इति भगवा गामन्तसेनासने झानं अप्पेत्वा निसिन्नभिक्खुतो अरञ्ञे निद्दायमानमेव पसंसति। तस्मा तमेव अत्थवसं पटिच्च ''आरञ्ञकेसु सेनासनेसु सापेक्खा भविस्सन्ती''ति आह।

पच्चत्तञ्ञेव सतिं उपट्ठापेस्सन्तीति अत्तनाव अत्तनो अब्भन्तरे सतिं उपट्ठपेस्सन्ति। **पेसला**ति पियसीला। इधापि सब्रह्मचारीनं आगमनं अनिच्छन्ता नेवासिका अस्सद्धा होन्ति अप्पसन्ना, विहारं सम्पत्तभिक्खूनं पच्चुग्गमन-पत्तचीवरपटिग्गहण-आसनपञ्ञापनतालवण्टग्गहणादीनि न करोन्ति। अथ नेसं अवण्णो उग्गच्छति ''असुकविहारवासिनो भिक्खू अस्सद्धा अप्पसन्ना विहारं पविट्ठानं वत्तप्पटिवत्तम्पि न करोन्ती''ति। तं सुत्वा पब्बजिता विहारद्वारेन गच्छन्तापि विहारं न पविसन्ति। एवं अनागतानं अनागमनमेव होति। आगतानं पन फासुविहारे असति येपि अजानित्वा आगता, ते ''वसिस्सामाति तावचिन्तेत्वा आगतम्हा, इमेसं पन नेवासिकानं इमिना नीहारेन को वसिस्सती''ति निक्खमित्वा गच्छन्ति। एवं सो विहारो अञ्ञेसं भिक्खूनं अनावासोव होति। ततो नेवासिका सीलवन्तानं दस्सनं अलभन्ता कङ्खाविनोदकं वा आचारसिक्खापकं वा मधुरधम्मसवनं वा न लभन्ति। तेसं नेव अग्गहितधम्मग्गहणं न गहितसज्झायकरणं होति। इति नेसं हानियेव होति, न वुड्ढि।

ये पन सब्रह्मचारीनं आगमनं इच्छन्ति, ते सद्धा होन्ति पसन्ना, आगतानं सब्रह्मचारीनं पच्चुग्गमनादीनि कत्वा सेनासनं पञ्ञपेत्वा देन्ति, ते गहेत्वा भिक्खाचारं पविसन्ति, कङ्खं विनोदेन्ति, मधुरधम्मस्सवनं लभन्ति। अथ नेसं कित्तिसद्दो उग्गच्छति ''असुकविहारे भिक्खू एवं सद्धा पसन्ना वत्तसम्पन्ना सङ्गाहका''ति। तं सुत्वा भिक्खू दूरतोपि आगच्छन्ति। तेसं नेवासिका वत्तं करोन्ति, समीपं गन्त्वा वुड्ढतरं आगन्तुकं वन्दित्वा निसीदन्ति, नवकतरस्स सन्तिके आसनं गहेत्वा निसीदित्वा ''इमस्मिं विहारे वसिस्सथ, गमिस्सथा''ति पुच्छन्ति। ''गमिस्सामा''ति वुत्ते ''सप्पायं सेनासनं, सुलभा भिक्खा''तिआदीनि वत्वा गन्तुं न देन्ति। विनयधरो चे होति, तस्स सन्तिके विनयं सज्झायन्ति। सुत्तन्तादिधरो चे, तस्स सन्तिके तं तं धम्मं सज्झायन्ति। ते आगन्तुकथेरानं ओवादे ठत्वा सह पटिसम्भिदाहि अरहत्तं पापुणन्ति। आगन्तुका ''एकं द्वे दिवसानि वसिस्सामाति आगतम्हा, इमेसं पन सुखसंवासताय दस द्वादस वस्सानि वसिम्हा''ति वत्तारो होन्ति। एवमेत्थ हानिवुड्ढियो वेदितब्बा।

४. दुतियसत्तकसुत्तवण्णना

२४. चतुत्थे **न कम्मारामा**ति ये दिवसं चीवरकम्म-कायबन्धनपरिस्सावन-धम्मकरण-सम्मज्जनि-पादकठलिकादीनेव करोन्ति, ते सन्धायेस पटिक्खेपो। यो पन तेसं करणवेलाय एवं एतानि करोति, उद्देसवेलाय उद्देसं गण्हाति, सज्झायवेलाय सज्झायति, चेतियङ्गणवत्तवेलाय चेतियङ्गणवत्तं करोति, मनसिकारवेलाय मनसिकारं करोति, न

सो कम्मारामो नाम।

यो इत्थिवण्णपुरिसवण्णादिवसेन आलापसल्लापं करोन्तोयेव रत्तिन्दिवं वीतिनामेति, एवरूपे भस्से परियन्तकारी न होति, अयं **भस्सारामो** नाम। यो पन रत्तिन्दिवं धम्मं कथेति, पञ्हं विस्सज्जेति, अयं अप्पभस्सोव भस्से परियन्तकारीयेव। कस्मा? ''सन्निपतितानं वो, भिक्खवे, द्वयं करणीयं धम्मी वा कथा अरियो वा तुण्हीभावो''ति (म० नि० १.२७३) वुत्तत्ता।

यो ठितोपि गच्छन्तोपि निसिन्नोपि थिनमिद्धाभिभूतो निद्दायतियेव, अयं **निद्दारामो** नाम। यस्स पन करजकायगेलञ्ञेन चित्तं भवङ्गं ओतरति, नायं निद्दारामो। तेनेवाह – ''अभिजानामहं, अग्गिवेस्सन, गिम्हानं पच्छिमे मासे पच्छाभत्तं पिण्डपातप्पटिक्कन्तो चतुग्गुणं सङ्घाटिं पञ्ञपेत्वा दक्खिणेन पस्सेन सतो सम्पजानो निद्दं ओक्कमिता''ति (म० नि० १.३८७)।

यो ''एकस्स दुतियो, द्विन्नं ततियो, तिण्णं चतुत्थो''ति एवं संसट्ठोव विहरति, एकको अस्सादं न लभति, अयं **सङ्गणिकारामो**। यो पन चतूसु इरियापथेसु एककोव अस्सादं लभति, नायं सङ्गणिकारामो।

असन्तसम्भावनिच्छाय समन्नागता दुस्सीला **पापिच्छा** नाम। येसं पापका मित्ता चतूसु इरियापथेसु सह अयनतो पापसहाया, ये च तन्निन्नतप्पोणतप्पब्भारताय पापेसु सम्पवङ्का, ते **पापमित्ता पापसहाया पापसम्पवङ्का** नाम।

ओरमत्तकेनाति अवरमत्तकेन अप्पमत्तकेन। **अन्तरा**ति अरहत्तं अप्पत्वाव एत्थन्तरे। **वोसान**न्ति परिनिट्ठितभावं ''अलमेत्तावता''ति ओसक्कनं। इदं वुत्तं होति – याव सीलपारिसुद्धिज्झानविपस्सना सोतापन्नभावादीनं अञ्ञतरमत्तकेन वोसानं नापज्जिस्सन्ति, ताव वुद्धियेव भिक्खूनं पाटिकङ्खा, नो परिहानीति।

७. सञ्ञासुत्तवण्णना

२७. सत्तमे **अनिच्चसञ्ञा**दयो अनिच्चानुपस्सनादीहि सहगतसञ्ञा।

८. पठमपरिहानिसुत्तवण्णना

२८. अट्ठमे उप्पन्नानं सङ्घकिच्चानं नित्थरणेन भारं वहन्तीति **भारवाहिनो। ते तेन पञ्ञायिस्सन्ती**ति ते थेरा तेन अत्तनो थेरभावानुरूपेन किच्चेन पञ्ञायिस्सन्ति। **तेसु योगं आपज्जती**ति पयोगं आपज्जति, सयं तानि किच्चानि कातुं आरभतीति।

९. दुतियपरिहानिसुत्तवण्णना

२९. नवमे **भिक्खुदस्सनं हापेती**ति भिक्खुसङ्घस्स दस्सनत्थाय गमनं हापेति। **अधिसीले**ति पञ्चसीलदससीलसङ्खाते उत्तमसीले। **इतो बहिद्धा**ति इमम्हा सासना बहिद्धा। **दक्खिणेय्यं गवेसती**ति देय्यधम्मपटिग्गाहके परियेसति। **तत्थ च पुब्बकारं करोती**ति तेसं बाहिरानं तित्थियानं दत्वा पच्छा भिक्खूनं देति। सेसं सब्बत्थ उत्तानमेवाति।

वज्जिसत्तकवग्गो ततियो।

४. देवतावग्गो

५. पठममित्तसुत्तवण्णना

३६. चतुत्थस्स पञ्चमे **दुद्ददन्ति** दुप्परिच्चजं महारहं भण्डकं। **दुक्करं करोतीति** कातुं असुकरं कम्मं करोति। **दुक्खमं खमतीति** सहायस्स अत्थाय दुरधिवासं अधिवासेति। **गुय्हमस्स आविकरोतीति** अत्तनो गुय्हं तस्स आविकरोति। **गुय्हमस्स परिगुहतीति** तस्स गुय्हं अञ्ञेसं नाचिक्खति। **खीणेन नातिमञ्ञतीति** तस्स भोगे खीणे तेन खयेन तं नातिमञ्ञति, तस्मिं ओमानं अत्तनि च अतिमानं न करोति।

६. दुतियमित्तसुत्तवण्णना

३७. छट्ठे **वत्ताति** वचनकुसलो। **वचनक्खमोति** वचनं खमति, दिन्नं ओवादं करोति। **गम्भीरन्ति** गुय्हं रहस्सं झाननिस्सितं विपस्सनामग्गफलनिब्बाननिस्सितं।

७. पठमपटिसम्भिदासुत्तवण्णना

३८. सत्तमे **इदं मे चेतसो लीनत्तन्ति** उप्पन्ने चेतसो लीनत्ते ''इदं मे चेतसो लीनत्त''न्ति यथासभावतो जानाति। **अज्झत्तं संखित्तं** नाम थिनमिद्धानुगतं। **बहिद्धा विक्खित्तं** नाम पञ्चसु कामगुणेसु विक्खित्तं। **वेदनातिआदीनि** पपञ्चमूलवसेन गहितानि। वेदना हि तण्हाय मूलं सुखवसेन तण्हुप्पत्तितो, सञ्ञा दिट्ठिया मूलं अविभूतारम्मणे दिट्ठिउप्पत्तितो, वितक्को मानस्स मूलं वितक्कवसेन अस्मीति मानुप्पत्तितो। **सप्पायासप्पायेसूति** उपकारानुपकारेसु। **निमित्तन्ति** कारणं। सेसं सब्बत्थ उत्तानत्थमेवाति।

देवतावग्गो चतुत्थो।

५. महायञ्ञवग्गो

१-२. सत्तविञ्ञाणट्ठितिसुत्तादिवण्णना

४४-४५. पञ्चमस्स पठमे **विञ्ञाणट्ठितियोति** पटिसन्धिविञ्ञाणस्स ठानानि। **सेय्यथापीति** निदस्सनत्थे निपातो, यथा मनुस्साति अत्थो। अपरिमाणेसु हि चक्कवाळेसु अपरिमाणानं मनुस्सानं वण्णसण्ठानादिवसेन द्वेपि एकसदिसा नत्थि। येपि हि कत्थचि यमकभातरो वण्णेन वा सण्ठानेन वा सदिसा होन्ति, तेसम्पि आलोकितविलोकितकथितहसितगमनट्ठानादीहि विसेसो होतियेव। तस्मा **नानत्तकायाति** वुत्ता। पटिसन्धिसञ्ञा पन नेसं तिहेतुकापि द्विहेतुकापि अहेतुकापि होति। तस्मा **नानत्तसञ्ञिनोति** वुत्ता। **एकच्चे च देवाति** छ कामावचरदेवा। तेसु हि केसञ्चि कायो नीलो होति, केसञ्चि पीतकादिवण्णो। सञ्ञा पन तेसं द्विहेतुकापि तिहेतुकापि होति, अहेतुका नत्थि। **एकच्चे च विनिपातिकाति** चतुअपायविनिमुत्ता उत्तरमाता यक्खिनी, पियङ्करमाता, फुस्समित्ता, धम्मगुत्ताति एवमादिका अञ्ञे च वेमानिका पेता। एतेसञ्हि पीतओदातकाळमङ्गुरच्छविसामवण्णादिवसेन चेव किस थूलरस्सदीघवसेन च कायो नाना होति, मनुस्सानं विय द्विहेतुकतिहेतुकअहेतुकवसेन सञ्ञापि। ते पन देवा विय न महेसक्खा, कपणमनुस्सा विय अप्पेसक्खा दुल्लभघासच्छादना दुक्खपीळिता विहरन्ति। एकच्चे काळपक्खे दुक्खिता जुण्हपक्खे सुखिता होन्ति। तस्मा

सुखसमुस्सयतो विनिपतितत्ता **विनिपातिका**ति वुत्ता। ये पनेत्थ तिहेतुका, तेसं धम्माभिसमयोपि होति पियङ्करमातादीनं विय।

ब्रह्मकायिकाति ब्रह्मपारिसज्जब्रह्मपुरोहितमहाब्रह्मानो। **पठमाभिनिब्बत्ता**ति ते सब्बेपि पठमज्झानेन अभिनिब्बत्ता। ब्रह्मपारिसज्जा पन परित्तेन अभिनिब्बत्ता, तेसं कप्पस्स ततियो भागो आयुप्पमाणं। ब्रह्मपुरोहिता मज्झिमेन, तेसं उपड्ढकप्पो आयुप्पमाणं, कायो च तेसं विप्फारिकतरो होति। महाब्रह्मानो पणीतेन, तेसं कप्पो आयुप्पमाणं, कायो च पन तेसं अतिविप्फारिकोव होति। इति ते कायस्स नानत्ता पठमज्झानवसेन सञ्ञाय एकत्ता **नानत्तकाया एकत्तसञ्ञिनो**ति वेदितब्बा।

यथा च ते, एवं चतूसु अपायेसु सत्ता। निरयेसु हि केसञ्चि गावुतं, केसञ्चि अड्ढयोजनं, केसञ्चि योजनं अत्तभावो होति, देवदत्तस्स पन योजनसतिको जातो। तिरच्छानेसुपि केचि खुद्दका, केचि महन्ता। पेत्तिविसयेसुपि केचि सट्ठिहत्था, केचि असीतिहत्था होन्ति, केचि सुवण्णा, केचि दुब्बण्णा। तथा कालकञ्चिका असुरा। अपिचेत्थ दीघपिट्ठिकपेता नाम सट्ठियोजनिकापि होन्ति। सञ्ञा पन सब्बेसम्पि अकुसलविपाकाहेतुकाव होति। इति आपायिकापि **नानत्तकाया एकत्तसञ्ञिनो**त्वेव सङ्ख्यं गच्छन्ति।

